Shri Raghunatha Temple MSS. Library,
६२०९ JAMMU

No. ६२२८

Title कृष्णस्तोत्रम्

Author

Extent १ पत्र Age

Subject स्तोत्र

रुद्रस्तोत्रम्
॥६२॥

॥ श्रीः ॥

श्रीगणेशाय नमः ॥ भजे व्रजैकमण्ड
नं समस्तपापखण्डनं स्वभक्तचित्तरंजनं
सदैवनन्दनंदनं सुपिच्छगुच्छमस्तकं
सुनादवेणुहस्तकम् अनङ्गरङ्गसागरं
नमामिकृष्णनागरं १ मनोजगर्वमोचनं
विशालभाललोचनं विधूतगोपशोचनं
नमामिपद्मलोचनं करारविंदभूधरं स्मि
तावलोकसुंदरं महेन्द्रमानदारणं नमा
मिकृष्णवारणं २ कदंबसूनकुंडलं सुचा
रुगण्डमण्डलं व्रजांगनैकवल्लभं न
मामिकृष्णदुर्लभं यशोदयासमोदया
सकोपयादयानिधिः उलूखले सुदुःस
हं नमामिनंदशावकम् ३ नवीनगोपनागरं
नवीनकेलिमंदिरं नवीनमेघसुंदरं भजे
व्रजैकमंदिरं सदैव पादपंकजं मदीय
मानसे निजे दधातिनंदबालकः सम
स्तभक्तपालकः ४ समस्तगोपनागरीहृ
दंव्रजैकमोहनं मैं नमामि कुंजमध्यगं
प्रसूनभालशोभिनस् दृगन्तकांतिभिंग
णं सहासबालसंगिनं दिने दिने नवं नवं
नमामिनंदसंभवं ५ गुणाकरं सुखाकरं
कृपाकरं कृपानरं त्वसमुखैकदायकं न
मामिगोपनायकं समस्तदोषशोषणं स
मस्तलोकतोषणं समस्तदासमानसं नमा
मिकृष्णलालसम् ६ समस्तगोपनागरी
निकामकामदायकम् दृगन्तचारुसायकं
नमामिवेणुनायकं भवो भवावतारकं भवा
ब्धिकर्णधारकं यशोमतेः किशोरकं नमा
मिदुग्धचोरकं ७ विदग्धमुग्धगोपिका
मनोमनोजदायकं नमामिमंजकानने
प्रवृद्धवह्निपायिनम् यदा तदा यथा
तथा तथैव कृष्णसत्कथा मया सदैव
गीयतां तथा कृपा विधीयताम् ॥८॥

नं ६८